एतान्विद्धि महाबाहो अपाङ्क्तेयान् द्विजाधमान्।
शूद्राणामुपदेशन्तु ये कुर्व्वन्त्यल्पबुद्धयः ॥
षष्टिं काणः शतं षण्ढः श्वित्री यावत् प्रपश्यति।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ! ॥
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
असूयते च यद्दत्तं यच्च श्रद्धादिवर्ज्जितम्।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन ॥”*॥
“तस्मात् परिवृते दद्यात्तिलांश्चान्नं विकीरयेत्।
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च ॥
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः।
अपाङ्क्तेयानतः पङ्क्त्यां भुञ्जानो ननु पश्यति।
तावत् फलाद्भ्रंशयति दातारं तस्य वाऽनिशम् ॥”
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः ॥

पङ्क्तिपावनः, पुं, (पङ्क्तिं श्राद्धोपलक्षे भोजनायोपविष्टानां वेदविद्याविशारदानां ब्राह्मणानां श्रेणीं पुनाति पावयति वा स्वोपवेशनेनेति। पङ्क्ति+पावि+ल्युः।) श्रेणिपवित्रकर्त्ता। श्राद्धभोजनार्हब्राह्मणः। यथा,—
“इमे हि मनुजश्रेष्ठ ! विज्ञेयाः पङ्क्तिपावनाः।
विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दश पूरुषः ॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः ॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः।
मखेषु च समस्तेषु भवन्त्यवभृथप्लुताः ॥
अक्रोधना ह्यचपलाः क्षान्ता दान्ता जितेन्द्रियाः।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान् निमन्त्रयेत् ॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः ॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः ॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः ॥
अनृत्विगनुपाध्यायः स चेदग्रासनं व्रजेत्।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्व्विवर्ज्जितः।
न च स्यात् पतितो राजन् ! पङ्क्तिपावन उच्यते ॥”
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः ॥
(पञ्चाग्निगृहस्थः। यथाह हारीतः।
“पवनः पावनस्त्रेता यस्य पञ्चाग्नयो गृहे।
सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः ॥”)

पङ्क्तिरथः, पुं, (पङ्क्तिषु दशसु दिक्षु गतो रथो यस्य।) दशरथराजः। इति शब्दरत्नावली ॥ तथा च।
“अयोध्यायां महाराजः पुरा पङ्क्तिरथो बली।
तस्यात्मजो रामचन्द्रः सर्व्वशूरशिरोमणिः ॥”
इति पाद्मे पातालखण्डम् ॥ (तथा, रघुः।९।७४।
“ नृपतेः प्रतिषिद्धमेव तत्
कृतवान् पङ्क्तिरथो विलङ्घ्य यत् ॥”)

पङ्क्तिवीजः, पुं, (पङ्क्तिभूतानि वीजानि यस्य सः।) वर्व्वूरवृक्षः। इति राजनिर्घण्टः ॥

पङ्गुः, पुं, (खञ्जति गतिवैकल्यं प्राप्नोतीति। खजि गतिवैकल्ये। “बाहुलकात् कुः। खजयोः पगौ नुमागमश्च।” उणां। १।३७। इति पगौ नुमागमश्च। अस्य कक्षाया अत्युच्चतया बहुकालेन राशिभागादिभोगात् मन्दगतित्वादस्य तथात्वम्।) शनैश्चरः। इति शब्दमाला ॥ (परिव्राट्। यथोक्तं चिन्तामणौ।
“ भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च।
योजनान्न परं याति सर्व्वथा पङ्गुरेव सः ॥”)

पङ्गुः, त्रि, (खजि गतिवैकल्ये। बाहुलकात् कुः। खस्य पत्वे जस्य गादेशः नुम् च। उणां १।३७।) जङ्घावैकल्येन चलनाक्षमः। तत्पर्य्यायः। श्रोणः २। इत्यमरः।२।६।४८॥ जङ्घाहीनः३। इति शब्दरत्नावली ॥ (यथा, महाभारते २।५।१२५।
“कच्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ ! तथा प्रव्रजितानपि ॥”
यानहरणेनैव लोकः पङ्गुर्भवति। यथा, मार्कण्डेये। १५।३१।
“पुष्यापहृद्दरिद्रश्च पङ्गुर्यानापहृन्नरः ॥”)
अस्य लक्षणं खञ्जशब्दे द्रष्टव्यम् ॥

पङ्गुलः, पुं, सितकाचाभघोटकः। इति हेमचन्द्रः ॥

पङ्गुत्वहारिणी, स्त्री, (सेवनेन पङ्गुलं पङ्गुत्वं हरति या। पङ्गुत्व+हृ+णिनि+ङीप्।) शिम्बीक्षुपः। इति राजनिर्घण्टः ॥

पच, इ क ततौ। इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्। इदित्।) ततिरिह विस्तारवचनम्। इ क, पञ्चयति धीरो ग्रन्थार्थम्। इति दुर्गादासः ॥ (यथा, गीतगोविन्दे। १०। १३।
“व्यथयति वृथा मौनं तन्वि ! प्रपञ्चय पञ्चमम्।
तरुणि ! मधुरालापैस्तापं विनोदय दृष्टिभिः ॥”)

पच, इ ङ व्यक्तीकारे। (भ्वां-आत्मं-सकं-सेट्।) इ, कर्म्मणि पञ्च्यते। ङ, पञ्चते स्वगुणं भिक्षुकः। इति दुर्गादासः ॥

पच, ङ औ व्यक्तीकारे। इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट्।) औ, पक्ता। ङ, पचते स्वगुणं भिक्षुकः। इति दुर्गादासः ॥

पच, डु ञ औ ष पाके। इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट्।) पाको विक्लित्त्यनुकूलव्यापारः। डु, पक्त्रिमम्। ञ, पचति पचते तण्डुलानोदनं लोकः। औ, पक्ता। ष, पचा। इति दुर्गादासः ॥

पचः, त्रि, पचति यः। (पच्+“नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।”३।१।१३४। इति अच्।) पाककर्त्ता। इति व्याकरणम् ॥ स्वार्थे कनि पचकश्च ॥

पचतः पुं, (पचतीति। “भृमृदृशियजिपर्व्विपच्यमितमिनमिहर्य्योऽतच्।” उणां।३।११०। इति अतच्।) सूर्य्यः। अग्निः। इन्द्रः। इत्युणादिकोषः ॥ (परिपक्वे, त्रि। यथा, ऋग्वेदे। १। ६१। ७। “पचतं सहीयान् विध्यद्वराहं तिरो अद्रिमस्ता ॥”)

पचतिकल्पं क्ली, (ईषदूनं पचतीति तिङन्तात् कल्पप्।) ईषदूनस्य पाकस्य कर्त्ता। इति व्याकरणम् ॥

पचत्पुटः, पुं, (पचत् पुटमस्य।) सूर्य्यमणिवृक्षः। इति शब्दचन्द्रिका ॥

पचन्, [त्] त्रि, (पचति यः। “लटः शतृशानचा-” २। २। १२४। इति शतृप्रत्ययः।) पाककर्त्ता। इति व्याकरणम् ॥

पचनं, क्ली, (पच्यते इति। पच्+भावे ल्युट्।) पाकः। (यथा, भागवते। ३। २६। ४०।
“द्योतनं पचनं पानमदनं हिममर्द्दनम् ॥”
पच्यतेऽनेन इति पचेः करणे ल्युट्। पाकसाधनम्। यथा, ऋग्वेदे। १। १६२। ६। “ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्त्तिर्न इन्वतु ॥”)

पचनः, पुं, (पचत्यसौ इति। पच्+कर्त्तरि ल्युः।) अग्निः। इति शब्दचन्द्रिका ॥ पाककर्त्तरि, त्रि ॥

पचनी, स्त्री, (भुक्तमजीर्णादिकं पच्यतेऽनया। पच्+करणे ल्युट् स्त्रियां ङीप्।) वनवीजपूरकः। इति राजनिर्घण्टः ॥

पचन्ती, स्त्री, (ओदनादीन् पचति या। पच्+शतृ+स्त्रियां ङीप्।) पाककर्त्री। इति व्याकरणम् ॥

पचमानः, त्रि, (पचतेऽसौ इति। “लटः शतृशानचौ”। २। २। १२४। इति शानच्।) पाककर्त्ता। इति व्याकरणम् ॥ (पुं, वह्निः ॥)

पचम्पचा, स्त्री, (पचं पचं पचति। पचेः खश ततो मुम्। स्त्रियां टाप्।) दारुहरिद्रा। इत्यमरः। २। ४। १०२ ॥

पचा, स्त्री, (पच्यते इति पचेः षित्वादङ् ततष्टाप्।) पाकः। इत्यमरः। ३। २। ८ ॥ (पचत्यसौ इति पचाद्यच् स्त्रियां टाप्। पाककर्त्री ॥)

पचिः, पुं, (पचतीति। पच्+“सर्व्वधातुभ्य इन्।” उणां। ४। ११७। इति इन्।) अग्निः। इति त्रिकाण्डशेषः ॥ पचनम्। इति संक्षिप्तसारव्याकरणम् ॥

पचेलिमः, पुं, (पचत्यसौ इति। “पच एलिमच्।” उणां। ४। ३७। इति एलिमच्।) सूर्य्यः। अग्निः। इत्युणादिकोषः ॥ कर्त्तुरनायासेन स्वयं पक्वे, त्रि। (स्वयमेव पच्यते पचः कर्म्मकर्त्तरि केलिमप्रत्ययः।) यथा, पचेलिमाः तण्डुलाः। इति मुग्धबोधव्याकरणम् ॥ (यथा च